# ब्रिलिएंट पब्लिक स्कूल

**सीपत रोड, बहतराई, बिलासपुर (छ.ग.)**

**वार्षिक परीक्षा - 2018-19**

**कक्षा - नवमी**

**विषय - संस्कृतम्**

समयः 3:00 घंटे | अंकाः 80

दिनांकः 27.02.2019 | दिन बुधवासरः

निर्देशः–

(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति (क), (ख), (ग), (घ)। चतुर्णां खण्डानां प्रश्नानाम् उत्तराणि लेखनम् अनिवार्यम् अस्ति।

(2) यथासम्भवं प्रत्येक खण्डानाम् उत्तराणि क्रमशः प्रदातव्यम्। अशुद्धिषु अंक कर्तनम् भविष्यति।

## खण्डः 'क' अपठित-अवबोधनम् (5 अङ्काः)

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–**

मधुरभाषणम् एतादृशः गुणः अस्ति, येन मानवः अखिलमपि जगत् वशीकर्तुं शक्नोति। मधुरभाषिणं सर्वे प्रेम्णा विश्वासेन च अवलोकयन्ति। मिष्टभाषी सर्वेषु स्निह्यति तस्मिन् च सर्वे स्निह्यन्ति। वाङ्माधुर्यात् प्रियतरं वाक्पारुष्यात् च अप्रियतरम् अन्यत् किमपि नास्ति। मधुरभाषणेनैव जनाः कोकिलं आद्रियन्ते वाक्पारुष्यात् च काकः दूरीक्रियते। कोकिलस्य काकली मयूरस्य केकारवः च कं मुग्धं न करोति? मधुरवाणी जनान् अलङ्करोति। सम्पूर्णे संसारे मानवः एव एतादृशः प्राणी अस्ति यः स्ववाण्या जनान् वशीकर्तुं शक्यते। कथितम् अपि–

**"तृणानि भूमिरुदकं वाक् चतुर्थी सुनृता।**
**एतानि सद्गृहेषु नोच्छिद्यन्ते कदाचन।"**

अर्थात्–श्रेष्ठानां गृहात् आसनम्, स्थानम्, जलम्, सत्ययुक्ता मधुरा च वाणी कदापि समाप्ताः न भवन्ति।

**I. एकपदेन उत्तरत–** 1

(i) सर्वेषु कः स्निह्यति?

(ii) का जनान् अलङ्करोति?

**II. पूर्णवाक्येन उत्तरत–** 2

(i) कस्मात् काकः दूरीक्रियते?

(ii) संसारे मानवः कीदृशः प्राणी अस्ति?

**III. भाषिककार्यम्–** 2

(i) मयूरस्य ........................ च कं न मुग्धं करोति? अत्र वाक्ये 'कं मुग्धं' पदयोः विशेषणं किम्?

(क) मुग्धम् (ख) मुग्धः (ग) कः (घ) कम्

(ii) अस्मिन् अनुच्छेदे 'प्रियतरम्' इत्यस्य विलोमपदं किं प्रयुक्तम् अस्ति?

(क) अप्रियतरम् (ख) अन्यत् (ग) मुग्धम् (घ) कोकिलम्

(iii) 'अवलोकयन्ति' इति क्रियायाः कर्तृपदं किम्?

(क) प्रेम्णा (ख) मधुरभाषिणम् (ग) सर्वे (घ) भाषिणम्

(iv) 'सम्पूर्णम्' इत्यस्य पदस्य कः पर्यायः?

(क) अखिलम् (ख) अखिलमपि (ग) वाक् (घ) जगत्

Brilliant Public School Bilaspur C.G.
www.brilliantbsp.com

## खण्डः 'ख' रचनात्मक-कार्यम् (15 अङ्काः)

**2. स्वविद्यालयस्य वर्णनं कुर्वन्तः मित्रं प्रति लिखिते अस्मिन् पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत–** 5

परीक्षाभवनम्

5 तिथिः ..............................

प्रिय (*i*) ............................!

(*ii*) ..............................।

भवतः पत्रं ह्यः एव प्राप्तम्। अहम् अधुना स्वविद्यालयस्य वर्णनं कर्तुम् इच्छामि। मम (*iii*) ............... अतीव (*iv*) .............................. अस्ति। मम विद्यालये विशालं (*v*) .............................., समृद्धाः प्रयोगशालाः, सुन्दरः (*vi*) ............... च सन्ति। उपप्रधानाचार्यः अतीव कर्मठः (*vii*) .................. च अस्ति। अस्माकम् (*viii*) .............................. मनोयोगेन पाठयन्ति। सर्वे छात्राः अपि योग्याः सन्ति।

विस्तरेण पुनः (*ix*) ..............................।

तव (*x*) ..............................

क०ख०ग०

**मञ्जूषा**

| |
|---|
| नमस्ते, क्रीडाक्षेत्रम्, मित्रम्, विद्यालयः, शोभनः, लेखिष्यामि, सद्व्यवहारशीलः, वयस्य, अध्यापकाः, पुस्तकालयः |

**3. मञ्जूषातः समुचितं पदम् आदाय सरलसंस्कृते 'रामायणम्' इत्यस्मिन् विषये पञ्चानां वाक्यानां निर्माणं कुरुत–** 5

**मञ्जूषा**

| |
|---|
| रामायणस्य, रामायणम्, अयोध्यायाः राज्ञः, तस्मै, श्रीरामः, अनुकरणीयम्, वाल्मीकिः, दशरथस्य, चरित्रम्, पुत्रः, मर्यादा पुरुषोत्तमः |

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत–**



**मञ्जूषा**

| |
|---|
| ज्ञानवर्धनाय, आवश्यकम्, पुस्तकालये, अनेकानि, पत्राणि पत्रिकाः च, कुर्वन्ति, अनेकेषाम्, सन्ति, विषयाणाम्, आगच्छन्ति, स्वाध्यायम्, बालाः, अध्ययनम्, पुस्तकानि |

Brilliant Public School Bilaspur C.G.
www.brilliantbsp.com

**4. अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत–** 5

(*i*) प्रकृति सभी प्राणियों की रक्षा करती है।

(*ii*) तुम सदैव सच बोलो।

(*iii*) वह सोने के महल को देखकर आश्चर्यचकित हो गई।

(*iv*) मैं तुम्हें खाने के लिए स्वादिष्ट चीज़ें दूँगा।

(*v*) आज संसार में निर्दयता बढ़ रही है।

## खण्डः 'ग' अनुप्रयुक्त-व्याकरणम् (25 अङ्काः)

**5. I. (*i*) वर्णसंयोजनेन पदनिर्माणं कृत्वा लिखत–** 3

क् + अ + म् + अ + ल् + अ + म् = ..............................

(*ii*) **प्रदत्तशब्दस्य शुद्धं वर्णविन्यासं लिखत–**

जननी = ....................................................................................।

**II. अधोलिखितानां प्रश्नानां समुचितम् उत्तराणि लिखत–**

(*i*) 'ऋ' वर्णस्य उच्चारणस्थानं किम्?

(*ii*) 'उपनेत्रम्' अत्र कः वर्णः नासिक्यः वर्तते?

**6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिच्छेदम् अथवा सन्धिं कृत्वा लिखत–** 4

(*i*) अहम् <u>वनोत्सवं</u> द्रष्टुं गच्छामि।

(*ii*) राजा सविनयं <u>पुनः + उवाच</u>।

(*iii*) <u>वागीश्वरी</u> मां पातु।

(*iv*) वसन्ततौ सर्वत्र <u>उत् + लासः</u> दृश्यते।

**7. उचितैः शब्दरूपैः रिक्तस्थानानि पूरयत–** 6

(*i*) अहम् .................................... जलम् आनयामि। (हरि)

(*ii*) रक्षाबन्धनोत्सवे भ्राता ................. उपहारं यच्छति। (भगिनी)

(*iii*) पत्रवाहकः ........................................ वितरन्ति। (पत्र)

(*iv*) उद्याने ................................................ क्रीडन्ति? (किम्)

(*v*) .............................. सप्ताहे सप्तदिनानि भवन्ति। (एक)

(*vi*) कालिदासस्य ............................ महाकाव्ये स्तः। (द्वि)

**8. कोष्ठकेषु प्रदत्तेषु धातुनाम् उचितं रूपं निर्माय वाक्यानि पूरयत–** 3

(*i*) जन्मदिवसः तुभ्यं शुभः ..................................। (भू-लोट्लकारे)

(*ii*) वयं परीक्षाविषये चिन्तिताः ..............................। (अस्-लट्लकारे)

(*iii*) अस्माकं देशे सर्वे जनाः सुखानि ......................। (लभ्-लट्लकारे)

**9. उचितविभक्तिपदैः रिक्तस्थानानि पूरयत–** 4

(*i*) ...................................................... नमः। (कृष्ण)

(*ii*) .................................. पुरः अग्निः ज्वलति। (भवन)

(*iii*) त्वं ............................................ सह चल। (अस्मद्)

(*iv*) सुनीता .............................. प्रवीणा अस्ति। (नृत्यकला)

Brilliant Public School Bilaspur C.G.
www.brilliantbsp.com
विद्या
BRILLIANT PUBLIC SCHOOL
सामाजिकं विज्ञानं प्रकाशयति तत्परम्
Wisdom for Universal Enlightenment

**10. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययविभागं संयोजनं वा कुरुत–** 3

(i) सः किं कथ् + तुमुन् उद्यतः प्रतीयते?

(ii) शीला श्वसुरालयं प्र + आप् + ल्यप् प्रसीदति।

(iii) शिशुः मोदकं दृष्ट्वा प्रसीदति।

**11. अधोलिखितवाक्येभ्यः उपसर्गयुक्तपदानि चित्वा लिखत–** 2

(i) बालकः पितरम् अनुकरोति।

(ii) अहं संस्कृतम् अवगच्छामि।

(iii) ते कथं प्रसीदन्ति?

(iv) जनाः उद्याने विहरन्ति।

## खण्डः 'घ' पठित-अवबोधनम् (35 अङ्काः)

**12. अधोलिखितं गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत–**

(अ) प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः तर्पयति च सुखसाधनैः। पृथिवी, जलं, तेजो, वायुः आकाशश्चास्याः प्रमुखानि तत्त्वानि। तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति। आव्रियते परितः समन्तात् लोकोऽनेनेति पर्यावरणम्। यथाऽजातशिशुः मातृगर्भे सुरक्षितस्तिष्ठति तथैव मानवः पर्यावरणकुक्षौ। परिष्कृतं प्रदूषणरहितं च पर्यावरणमस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं, सत्यसङ्कल्पं माङ्गलिकसामग्रीञ्च प्रददाति। प्रकृतिकोपैः आतङ्कितो जनः किं कर्तुं प्रभवति? जलप्लावनैः, अग्निभयैः, भूकम्पैः, वात्याचक्रैः, उल्कापातादिभिश्च सन्तप्तस्य मानवस्य क्व मङ्गलम्?

**I. एकपदेन उत्तरत–** 2

(i) प्रकृतिः केषाम् संरक्षणाय यतते?

(ii) का विविधैः प्रकारैः सर्वान् पुष्णाति तर्पयति च?

**II. पूर्णवाक्येन उत्तरत–** 2

(i) प्रकृतिः कथं रक्षणं करोति?

(ii) प्रकृतिकोपैः जनः कथम् आतङ्कितः भवति?

**III. भाषिककार्यम्–** 2

(i) 'इयं सर्वान् पुष्णाति' अत्र 'इयम्' सर्वनामिकविशेषणपदस्य विशेष्यपदं किं प्रयुक्तम्?
(क) यतते (ख) पुष्णाति (ग) प्रकृतिः (घ) तर्पयति

(ii) 'शुद्धम्' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्?
(क) सद्विचारम् (ख) परिष्कृतम् (ग) सुखम् (घ) संकल्पम्

(iii) 'प्रददाति' इति क्रियापदस्य कर्तृपद किम्?
(क) परिष्कृतम् (ख) प्रदूषणरहितम् (ग) पर्यावरणम् (घ) सांसारिकम्

(iv) 'कुविचारम्' इति पदस्य विलोमपदं गद्यांशे किम्?
(क) सुखम् (ख) दुखम् (ग) सद्विचारम् (घ) सांसारिकम्

(ब) **तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः।**
**चकार बहुधा गात्रे व्रणान्पतगसत्तमः॥** 2

**I. एकपदेन उत्तरत–**

(i) महाबलः कः आसीत्?

(ii) कः पतगसत्तमः?

Brilliant Public School Bilaspur C.G.
www.brilliantbsp.com

**II. पूर्णवाक्येन उत्तरत–** 2

(*i*) जटायुः व्रणान् कुत्र चकार?

(*ii*) जटायोः नखाः कीदृशाः आसन्? 2

**III. भाषिककार्यम्–**

(*i*) 'तीक्ष्णनखाभ्याम् चरणाभ्याम्' अनयोः पदयोः विशेषणपदं किम्?

(क) तीक्ष्णनखः (ख) तीक्ष्णनखाभ्याम् (ग) चरणाभ्याम् (घ) चरणौ

(*ii*) 'चकार बहुधा गात्रे व्रणान्पतगसत्तमः'। अस्मिन् वाक्ये क्रियापदं किम् वर्तते?

(क) बहुधा (ख) गात्रे (ग) व्रणान् (घ) चकार

(*iii*) 'शरीरे' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(क) गात्रे (ख) बहुधा (ग) व्रणान् (घ) तस्य

(*iv*) 'दुर्बलः' इति पदस्य अत्र विलोमपदं किम्?

(क) तस्य (ख) तीक्ष्णः (ग) महाबलः (घ) चकार

**(स)** श्वेतकेतुः – सम्यगवगतं भगवन्!

आरुणिः – वत्स! पीयमानानाम् अपां योऽणिमा स ऊर्ध्वः समुदीषति स एव प्राणो भवति।

श्वेतकेतुः – भगवन्! वाचमपि विज्ञापयतु।

आरुणिः – सौम्य! अश्यमानस्य तेजसो योऽणिमा, स ऊर्ध्वः समुदीषति। सा खलु वाग्भवति। वत्स! उपदेशान्ते भूयोऽपि त्वां विज्ञापयितुमिच्छामि यदन्नमयं भवति मनः, आपोमयो भवति प्राणास्तेजोमयी च भवति वागिति। किञ्च यादृशमन्नादिकं गृहणाति मानवस्तादृशमेव तस्य चित्तादिकं भवतीति मदुपदेशसारः। वत्स! एतत्सर्वं हृदयेन अवधारय।

श्वेतकेतुः – यदाज्ञापयति भगवन्। एष प्रणमामि।

आरुणिः – वत्स! चिरञ्जीव। तेजस्वि नौ अधीतम् अस्तु।

**I. एकपदेन उत्तरत–**

(*i*) कः सम्यक् अवगच्छति? 2

(*ii*) 'चिरञ्जीव!' इति कः कथयति?

**II. पूर्णवाक्येन उत्तरत–**

(*i*) आरुणेः उपदेशस्य सारः किम् अस्ति? 2

(*ii*) मनः कीदृशं भवति?

**III. भाषिककार्यम्–** 2

(*i*) 'प्रणमामि' इति क्रियापदस्य कर्ता कः?

(क) अहम् (ख) भगवन् (ग) यः (घ) आरुणिः

(*ii*) 'पठितम्' इति पदस्य पर्यायपदं गद्यांशे किम्?

(क) चित्तादिकम् (ख) अधीतम् (ग) सर्वम् (घ) एतम्

(*iii*) 'भवतीति मदुपदेशसारः' अत्र 'मत्' पदम् कस्मै प्रयुक्तम्?

(क) श्वेतकेतवे (ख) साधवे (ग) गुरवे (घ) आरुणये

(*iv*) अनुच्छेदे 'अधः' इत्यस्य पदस्य कः विपर्ययः आगतः?

(क) ऊर्ध्वः (ख) मध्यः (ग) नीचैः (घ) उपरि

**13. अधोलिखितस्य श्लोकद्वयस्य अन्वयम् उचितपदैः पूरयत–** 4

**I.** प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता॥

**अन्वयः–** सर्वे जन्तवः (*i*) ............ प्रदानेन (*ii*) ............ , तस्मात् (*iii*) ............ एव (*iv*) ............ , वचने का दरिद्रता।

**मञ्जूषा**

| |
|---|
| वक्तव्यम्, प्रियवाक्य, तुष्यन्ति, तत् |

Brilliant Public School Bilaspur C.G.
www.brilliantbsp.com
BRILLIANT PUBLIC SCHOOL
विद्या
Wisdom for Universal Enlightenment

II. यो मां पुत्रप्रीत्या पोषयति स्वामिनो गृहे तस्य।
रक्षानियोगकरणान्न मया भ्रष्टव्यमीषदपि॥

**अन्वयः–** यः पुत्रप्रीत्या (*i*) .............. पोषयति तस्य (*ii*) .............. गृहे (*iii*) .............. कारणात् मया (*iv*) .............. अपि न भ्रष्टव्यम्।

**मञ्जूषा**

| |
|---|
| ईषत्, स्वामिनः, माम्, रक्षानियोग |

**अथवा**

**अधोलिखितस्य श्लोकस्य भावार्थं मञ्जूषायाः पदसहायतया पूरयत–**

गुणा गुणज्ञेषु गुणा भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः, समुद्रमासाद्य भवन्त्यपेयाः॥

**भावार्थः–** गुणाः सदैव गुणीनां (*i*) .............. प्राप्य सद्गुणाः भवन्ति परन्तु गुणहीनान् प्राप्य दोषरूपे (*ii*) .............. भवन्ति। यथा नद्याः जलं (*iii*) .............. शुद्धं पेयं च भूत्वा अपि समुद्रे मिलित्वा (*iv*) .............. भवति। अतः गुणीजनैः कदापि दुर्जनस्य संगतिः न कर्तव्या।

**मञ्जूषा**

| |
|---|
| स्वादिष्टम्, संगतिम्, अपेयम्, परिवर्तिताः |

14. **अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–** 5
   (*i*) कुक्कुरः <u>मनुष्याणां</u> मित्रम् अस्ति।
   (*ii*) <u>खिन्नः</u> बालक कुक्कुरम् अकथयत्।
   (*iii*) भीमः <u>बाहुभ्यां</u> नेष्यति।
   (*iv*) <u>संसारे</u> किञ्चिदपि शाश्वतं नास्ति।
   (*v*) <u>सिकता</u> जलप्रवाहे न स्थास्यति।

15. **अधोलिखितवाक्यानि घटनाक्रमानुसारं पुनर्लिखत–** 4
   (*i*) सः तु चटकपोतं दृष्ट्वा अवदत्– 'मम मित्रं भविष्यसि'?
   (*ii*) सः चिन्तयामास—विरमन्तु एते पुस्तकदासाः वराकाः। अहं पुनः आत्मानं विनोदयिष्यामि।
   (*iii*) सः तु नीडनिर्माणे व्यस्तः आसीत् अतः स्वकर्मणि व्यग्रो वभूव।
   (*iv*) प्रीतः बालः श्वानं सम्बोधयामास—रे मनुष्याणां मित्र! किम् अस्मिन् निदाघे मया सह पर्यटसि?
   (*v*) एकः बालः पाठशालागमनवेलायां क्रीडितुं गच्छति।
   (*vi*) एते निष्कुटवासिनः प्राणिनः एव मम वयस्याः सन्ति।
   (*vii*) न, अहं स्वामिनं सेवे अतः रक्षानियोगात् भ्रष्टः न भविष्यामि।
   (*viii*) सः स्व उचितं भविष्यं विचार्य त्वरितं विद्यालयं गतवान्।

16. **अधोलिखितपदानां तेषां विपर्ययपदैः सह मेलनं कुरुत–** 4
   (*i*) ऊर्ध्वम् – प्रहृष्टमनाः
   (*ii*) आदितः – चिरम्
   (*iii*) सत्वरम् – अधः
   (*iv*) दुःखितमनाः – अन्ततः

===000===

Brilliant Public School Bilaspur C.G.
www.brilliantbsp.com